A

# SAMAGRA SHIKSHA, KERALA

911

## Annual Evaluation - 2022-23

First Language - Paper I - Part I

## SANSKRIT

(For Academic and Sanskrit Schools)

**Class- IX**

Time -1½ Hours — Total Score - 40

**निर्देशाः -**

- १५ निमेषाः समाश्वासकालः । प्रश्नान् पठितुम् उत्तराणि क्रमीकर्तुं च अयं कालः उपयोक्तव्यः।
- प्रश्नान् निर्देशान् च सम्यग् अवगम्य एव उत्तराणि लेखनीयानि ।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- विवर्तनप्रश्नाद् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या ।

**1. चतुर्णां प्रश्नानां समुचितमुत्तरं कोष्ठकात् चित्वा लिखत।** **4x1=4**

क) यास्काचार्येण विरचितः ग्रन्थः कः ?

(मनुष्यालयचन्द्रिका, निरुक्तम् , गणितसारसङ्ग्रहः , मयमतम्)

ख) सत्यामलकम इत्यस्य आधुनिकं नाम किम्?

( तिरुवनन्तपुरम्, तृश्शिवपेरूर्, तिरुनेल्लि, तिरुवल्ला )

ग) मूषिकवंशस्य स्थापकः कः ?

(जयमानी , रामघटमूषिकः, वलभः, कुन्दवर्मा )

घ) मृच्छकटिके नायकः कः ?

(आर्यकः, चारुदत्तः, मैत्रेयः, वर्धमानकः )

ङ) दर्शनमालायाः कर्ता कः ?

(स्वामी विवेकानन्दः , श्रीनारायणगुरुः, चट्टम्पिस्वामी, श्रीशङ्कराचार्यः )

**2. पट्टिकां पूरयत।** **4x1=4**

| | कर्ता | कृतिः | विभागः |
|---|---|---|---|
| उदा- | भवभूतिः | उत्तररामचरितम् | नाटकम्। |
| | अतुलकविः | ................. | चरित्रकाव्यम् । |
| | श्रीमङ्गलं नीलकण्ठन् मूस्सत् | मनुष्यालयचन्द्रिका | .................... । |
| | ................ | मातृपञ्चकम् | स्तोत्रकाव्यम्। |
| | श्रीपतिः | गणिततिलकम् | ....................। |

3. **उदाहरणानुसारं लिखत।** 1x1=1

उदा- धीः + अपि - धीरपि।

क) श्रीः + अपि - ..........................................।

4. **उदाहरणानुसारं लिखत।** 1x1=1

उदा- पङ्कजम् - पङ्के जातम् ।

क) जलजम् - ..........................................।

5. **अधोदत्तवाक्यात् सम्बोधनपदं चित्वा लिखत।** 1x1=1

क) भो नृपराम! भटस्थलीं पालय ।

6-10 **अधोदत्तेभ्यः प्रश्नेभ्यः चतुर्णाम् उत्तराणि लिखत ।** 4x2=8

6. **समानार्थकपदं कोष्ठकात् चित्वा लिखत।**

क) पार्थिवः - .................... (राजा/नरः)

ख) आतपत्रम् - ...................(छत्रम् / पत्रम्)

7. **उदाहरणानुसारं वाक्यं परिवर्तयत ।**

उदा - सन्तापेन किमपि प्रयोजनं नास्ति। **अलं सन्तापेन।**

क) दुःखेन किमपि प्रयोजनं नास्ति। ..........................................।

8. **वेदान् वेदाङ्गानि च विविच्य पट्टिकां पूरयत।**

**शिक्षा, साम, छन्दः, ऋक्**

| वेदः | वेदाङ्गम् |
|---|---|
| | |
| | |

9. **उदाहरणानुसारं वाक्यं परिवर्तयत ।**

उदा - रोगः बाधते। जनाः औषधं पिबन्ति ।

**यदा** रोगः बाधते **तदा** जनाः औषधं पिबन्ति ।

क) कोरोणा शाम्यति । सर्वे मुखावरणं त्यजन्ति। ..........................................।

10. **अधोदत्तं वाक्यं पठित्वा क्त्वान्त - तुमुन्नन्ताव्यये चित्वा लिखत।**

ज्ञानार्जनेन समाजोद्धारणं साध्यमिति ज्ञात्वा गुरुदेवः विद्याम् आर्जयितुं प्रेरयामास ।

11. **प्रादेशिकभाषया विवर्तयत।** 1x5=5

बालसाहित्यकारः कविः गानरचयिता च भवति डा. मुत्तलपुरं मोहन्दास् महोदयः। सः महात्मगान्धीसर्वकलाशालायाम् अध्यापकः आसीत्। ' गीतकं मनोहरं ',' मधुरं गायतु ' इत्याद्याः संस्कृतकवितासमाहाराः तेन विरचिताः भवन्ति। चङ्ङम्पुषामहाशयस्य ' रमणन् ' इति कवितां संस्कृतभाषया अनूदितवान् अयं महाशयः। संस्कृताध्यापने नूतनतन्त्राणाम् आविष्कारेण 2004-2005 तमे वर्षे एन्.सि.इ.आर्.टि संस्थया समादृतः च।

12-14 अधोदत्तेभ्यः प्रश्नेभ्यः द्वयोः उत्तरे लिखत । 2x4=8

12. **गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

क्रिस्त्वब्दे 1947 तमे वर्षे आगस्त् मासस्य 15 दिनाङ्के भारतं स्वतन्त्रम् अभवत्। किन्तु संविधानानुसारं गणतन्त्रशासनपद्धतेः स्थापनं 1950 तमे वर्षे जनुवरिमासस्य 26 दिनाङ्के अभवत्। भारतस्य संविधानस्य रचयितृषु प्रमुखः आसीत् डा. अम्बेद्कर्। संविधानस्य प्रस्तावना प्रथमप्रधानमन्त्रिणा जवहर्लाल् नेहरु महाशयेन लिखिता। प्रतिवर्षं जनुवरिमासस्य 26 दिनाङ्के भारते सर्वत्र गणतन्त्रदिवसः सोत्साहमाघुष्यते।

(संविधानम् ഭരണഘടന)

क) भारतसंविधानस्य रचयितृषु प्रमुखः कः?

ख) भारते गणतन्त्रदिवसः कस्मिन् दिनाङ्के आघुष्यते?

ग) **वर्षे वर्षे** इत्यस्य एकपदं खण्डिकातः चित्वा लिखत।

घ) संविधानस्य प्रस्तावना केन लिखिता?

13. **सूचनाः उपयुज्य 'वास्तुशास्त्रम्' अधिकृत्य लघुटिप्पणीं लिखत।**

**सूचनाः** - शास्त्रमधिकृत्य विशेषज्ञानम् - भारतीयशास्त्राणि- वास्तुशास्त्रम्- स्थापत्यवेदः - प्रशस्तग्रन्थाः - परिस्थितेरनुकूला आवासव्यवस्था।

14. **श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

तृणानि नोन्मूलयति प्रभञ्जनो  
मृदूनि नीचैः प्रणतानि सर्वतः ।  
समुच्छ्रितानेव तरून् प्रबाधते  
महान् महत्येव करोति विक्रमम् ।।

**क)** प्रभञ्जनः कानि नोन्मूलयति ?

**ख)** कः महति विक्रमं करोति?

**ग)** **नोन्मूलयति** इत्यस्य पदच्छेदं लिखत।

**घ)** श्लोके **वृक्षान्** इत्यर्थे प्रयुक्तं पदं किम् ?

15-17 अधोदत्तेभ्यः प्रश्नेभ्यः द्वयोः उत्तरे लिखत । 2x4=8

15. सूचनाः उपयुज्य 'गणितशास्त्रम्' अधिकृत्य लघुटिप्पणीं लिखत।

**सूचनाः** - शास्त्रमधिकृत्य ज्ञानम् - भारतीयशास्त्राणि- गणितशास्त्रम्- शुल्बसूत्रम् - ज्यामिति, वर्गमूलम् - आर्यभटः, बोधायनः, कात्यायनः - नलन्दा तक्षशिला- 'शून्यस्य' आविष्कारः।

16. रूपरेखां पठित्वा जीवनचरितं लिखत।



नाम - द्रौपदी मुर्मु।

जन्म - 1958 जूण् 20, ओडीषा,मयूर्भञ्ज् ।

पिता - बिराञ्चि नारायण टुडु।

वृत्तिः - अध्यापिका।

प्रशस्तिः - राज्यपालकः, राष्ट्रपतिः ।

17. कोष्ठकात् समुचितं पदं स्वीकृत्य पट्टिकां पूरयत।

| निर्वचनम् | पदम् |
|---|---|
| तुरेण गच्छति । | .................... |
| हिमम् अस्ति अस्मिन् । | .................... |
| खे शेते । | .................... |
| उन्नतस्य भावः । | .................... |

शाखा ।
तुरगः।
हिमवान् ।
औन्नत्यम् ।
ऐश्वर्यम्।